मोक्षश्च नव तत्त्वानीति"। सङ्क्षेपेप्रवृत्ता वयमुपरताः स्म। अत सर्व्वत्र सप्तभङ्गिनयाख्यं न्यायमवतारयन्ति जैनाः "स्यादस्ति स्यान्नास्ति स्यादस्ति च नास्ति च। स्यादवक्तव्यः स्यादस्ति चावक्तव्यः स्यान्नास्ति चावक्तव्यः स्यादस्ति च नास्ति चावक्तव्य इति"। तत्सर्व्वमनन्तवीर्य्यः प्रत्यपीपदत् "तद्विधानविवक्षायां स्यादस्तीति गतिर्भवेत्। स्यान्नास्तीति प्रयोगः स्यात्तन्निषेधे विवक्षिते॥ क्रमेणोभयवाञ्छायां प्रयोगः समुदायभाक्। युगपत्तद्विवक्षायां स्यादवाच्यमशक्तितः॥ आद्योवाच्यविवक्षायां पञ्चमो भङ्ग इष्यते। अन्त्योवाच्याविवक्षायां षष्ठोभङ्गसमुद्भवः॥ समुच्चयेन युक्तश्च सप्तमो भङ्ग उच्यत इति"। स्याच्छब्दः खल्वयं निपातः तिङन्तप्रतिरूपकोऽनेकान्तद्योतकः। यथोक्तम् "वाक्येष्वनेकान्तद्योति गम्यं प्रति विशेषणम्। स्यान्निपातोऽर्थयोगित्वात्तिङन्तप्रतिरूपक" इति॥ यदि पुनरेकान्तद्योतकः स्याच्छब्दोऽयं स्यात्तदा स्यादस्तीति वाक्ये स्यात्पदमनर्थकं स्यात् अनेकान्तद्योतकत्वे तु स्यादस्ति कथञ्चिदस्तीति स्यात्स्यात्पदात् कथञ्चिदिति अयमर्थो लभ्यते इति नानर्थक्यम्। तदाह "स्याद्वादः सर्व्वथैकान्तत्यागात् किं वृत्तचिद्विधेः। सप्तभङ्गिनयापेक्षो हेयादेयविशेषकृदिति:"॥ यदि वस्त्वस्त्येकान्ततः सर्व्वथा सर्व्वत्र सर्व्वात्मनास्तीति न उपादित्साजिहासाभ्यां क्वचित् कदा केनचित्प्रवर्त्तेत निवर्त्तेत वा प्राप्तप्रापणीयत्वहेयहानानुपपत्तेश्च। अनेकान्तपक्षे तु कथञ्चित् केनचित् सत्त्वेन हानोपादाने प्रेक्षावतामुपपद्येते। किञ्च वस्तुनः सत्त्वं स्वभावः असत्त्वं वेत्यादि प्रष्टव्यं न तावदस्तित्वं वस्तुनः स्वभाव इति समस्ति घटोऽस्तीत्यनयोः पर्य्यायतया युगपत्प्रयोगायोगात् नास्तीति प्रयोगविरोधाच्च एवमन्यत्रापि योज्यम्। यथोक्तम् "घटोऽस्तीति न वक्तव्यं सन्नेव हि यतो घटः। नास्तीत्यपि न वक्तव्यं विरोधात् सदसत्त्वयोरित्यादि" तस्मादित्थं वक्तव्यं सदसत्सदसदनिर्व्वचनीयवादभेदेन प्रतिवादिनश्चतुर्विधाः पुनरप्यनिर्व्वचनीयमतेनामिश्रितानि सदसदादिमतानीति त्रिविधाः तान् प्रति किं वस्त्वस्तीत्यादिपर्य्यनुयोगे कथञ्चिदस्तीत्यादिप्रतिवचनसम्भवेन ते वादिनः सर्व्वे निर्विण्णाः सन्तः तूष्णीमासत इति सम्पूर्णार्थविनिश्चायिनः स्याद्वादमङ्गीकुर्व्वतस्तत्र तत्र विजय इति सर्व्वमुपपन्नम्। यदवोचदाचार्य्यः स्याद्वादमञ्जर्य्याम्। "अनेकान्तात्मकं वस्तु गोचरः सर्व्वसंविदाम्। एकदेशविशिष्टोऽर्थो न यस्य विषयो मतः॥ न्यायानामेकनिष्ठानां प्रवृत्तौ श्रुतवर्त्मनि। सम्पूर्णार्थविनिश्चायि स्याद्वस्तु श्रुतमुच्यते "अन्योन्यपक्षप्रतिपक्षभावाद्यथापरे मत्सरिणः प्रवादाः। नयानशेषानविशेषमिच्छन्नपक्षपाती समयस्तथार्हतः" इति॥ जिनदत्तसूरिणा जैनं मतमित्युक्तम्। "बलभोगोपभोगानामुभयोर्दानलाभयोः। अन्तरायस्तथा निद्रा भीरज्ञानं जुगुप्सितम्। हिंसा रत्यरती रागद्वेषौ रतिरतिस्मरः। शोको मिथ्यात्वमेतेऽष्टादश दोषा न यस्य सः। जिनो देवोगुरुः सम्यक् तत्त्वज्ञानोपदेशकः। ज्ञानदर्शनचारित्राण्यपवर्गस्य वर्त्मनि। स्याद्वादस्य प्रमाणे द्वे प्रत्यक्षमनुमापि च। नित्यानित्यात्मकं सर्व्वं नव तत्त्वानि सप्त वा। जीवाजीवौ पुण्यपापे चास्रवःसंवरोऽपि च। बन्धो निर्जरणं मुक्तिरेषां व्याख्याधुनोच्यते। चेतनालक्षणो जीवः स्यादजीवस्तदन्यकः। सत्कर्म्मपुद्गलाः पुण्यं पापं तस्य विपर्य्ययः। आस्रवः कर्म्मणां बन्धो निर्जरस्तद्वियोजनम्॥ अष्टकर्म्मक्षयान्मोक्षोऽथान्तर्भावश्च कैश्चन। पुण्यस्य संस्रवे पापस्यास्रवे क्रियते पुनः॥ लब्धानन्तचतुष्कस्य लोकागूढस्य चात्मनः। क्षीणाष्टकर्म्मणोमुक्तिर्निर्व्यावृत्तिर्जिनोदिता सरजोहरणा भैक्षभुजो लुञ्चितमूर्द्धजाः। श्वेताम्बराः क्षमाशीलाः निःसङ्गा जैनसाधवः॥ लुञ्चिताः पिच्छिकाहस्ताः पाणिपात्रा दिगम्बराः। ऊर्द्ध्वाशिनो गृहे दातुर्द्वितीयाः स्युर्जिनर्षयः॥ भुङ्क्ते न केवलं न स्त्री मोक्षमेति दिगम्बरः। प्राहुरेषामयं भेदोमहान् श्वेताम्बरैः सहेति"॥

**अर्हन्त** पु॰ अर्ह–बा॰ झ। जैनदेवे अर्हति।

**अर्हन्ती** स्त्री अर्हतः पूज्यस्य भावः ष्यञ् नुम् ङीष् यलोपः॥ पूज्यतायाम्—"श्रौत्राहन्तीचणैर्गुणैः" सि॰कौ॰।

**अर्हा** स्त्री चु॰ अर्ह–अङ्। पूजायाम्। युच् क्तिनएव बाधकः

**अर्हित** त्रि॰ अर्ह–क्त। पूजिते। "अभ्यर्हितञ्च" का॰वा॰

**अर्ह्य** त्रि॰ चु॰ अर्ह–कर्म्मणि ण्यत्। १प्राप्तुं योग्ये २स्तोतुं योग्ये च। चु॰ अर्ह–यत्। ३पूज्ये।

**अल** भूषणे, वारणे, भ्वा॰ उभ॰सक॰ पर्य्याप्तौ अक॰ सेट्। अलति ते आलीत् आलिष्ट।

**अल** न॰ अल–अच्। १वृश्चिकपुच्छस्थे कण्टकाकारे पदार्थे हेम॰। २हरिताले रत्नमा॰।

**अलक** पु॰ अलति भूषयति मुखम् अल–क्वुन्। १ललाटस्थे छिन्नाग्रे कुटिलकेशे, "कलकलोऽलकलोलदृशाऽन्यया" माघः "ललाटिकाचन्दनधूसरालका" कुमा॰ "अस्पृष्टालके-